Postal Regd.No. GAMC- 1553/2025-2027
ISSN 2454-6313

# संस्कृत-साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकी पत्रिका)
वर्षः : २० अङ्कः : २२९
मे - २०२५

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2025-2027 issued by SSP Ahmedabad. Valid upto 31-12-2027. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### मृदुले मस्तिष्के प्रखराः प्रहाराः

चीनदेशस्य जनानां देहयष्टिः सामान्यतः स्थूलतां न प्राप्नोति । परन्तु केभ्यश्चित् वर्षेभ्यः तेषां शरीरे महत् परिवर्तनं दृष्टिगोचरम् अभवत् । केषुचित् महानगरेषु वसन्तः बालकाः अचिन्त्येन कारणेन स्थूलकायाः दृश्यन्ते स्म । तेषां जिनेटिकस्तरे तु स्थूलतायाः सम्भावना न आसीत् । ततः केचन चिकित्सकाः अस्मिन् विषये परीक्षणं प्रारभन्त । तैः सत्यस्य द्वारम् उद्घाटितम् । चिकित्सकानां निष्कर्षः आसीत् – 'बालकाः विद्यालयात् आगत्य, अधिकं समयं दूरदर्शनस्य पुरतः कार्टूनचलचित्रदर्शनेन यापयन्ति । ते प्राङ्गणक्रीडाः प्रायः विस्मृतवन्तः । ततः तेषां शारीरः व्यायामः अवरुद्धः, अपि च दूरदर्शनस्य पुरतः निरन्तरम् उपविष्टाः ते अत्याहारं कुर्वन्ति । परिणामतः मेदोवर्धनेन सह तेषां शरीरं स्थूलतां प्राप्नोति ।' चीनशासकैः स्थितेः सर्वतः परीक्षणं कृत्वा ई.स. २००७ तमे वर्षे सार्वत्रिकी सूचना प्रसारिता – 'सायङ्काले चतुर्वादनतः रात्रौ अष्टवादनं यावत् बालकैः कार्टूनचित्राणि न द्रष्टव्यानि ।' अनेन निर्णयेन प्रारम्भे विरोधः उत्पन्नः । किन्तु बालकान् नानाक्रीडासु व्यापृतान् दृष्ट्वा प्रजाभिः निर्णयस्य प्रशंसा अपि कृता । व्यतीतेषु दिवसेषु बालकानां शरीरे कृशतायाः उदयः अभवत् । चीनदेशात् पाठं पठित्वा नोर्वे–स्वीडन–डेन्मार्क–आदयः देशाः अपि जागरिताः । बालकानां कोमले मस्तिष्के हिंसाप्रधानानि चित्राणि बहुविधानि दूषणानि रोपयन्ति । प्रतिबन्धः आवश्यकः । नो चेत् एवं भवति – १. आ शैशवात् कार्टूनचलचित्राणि पश्यन्तः बालकाः, यावत् विद्यालयेषु प्राथमिकं शिक्षणं पूर्णं कुर्वन्ति तावत् प्रायः १८००० हिंसात्मकानि चित्राणि पश्यन्ति । प्रत्येकं चित्रं नैकान् दृढान् संस्कारान् बालकानां मस्तिष्के रोपयति । ते संस्काराः बहूनि वर्षाणि तथैव तिष्ठन्ति । २. हिंसात्मकानि चित्राणि पश्यन्तः बालकाः, कुटुम्बे वसतः वृद्धान् जनान् प्रति कठोराः भवन्ति । शुश्रूषायाम् उत्साहं न दर्शयन्ति । मातापित्रोः हितवचनं न शृण्वन्ति । तेषां स्वभावः आक्रामकः भवति । तेन कारणेन ते परहानिम् आत्महानिं वा कुर्वन्ति । ३. उन्नतात् पर्वतात् पतितः अपि मनुष्यः जीवितुं शक्नोति इति भ्रमः बालकानां मनसि जायते । तस्मात् बालकाः अविचारं कूर्दनं कुर्वन्ति । इतराणि च साहसानि कुर्वन्ति । तत्र ते क्वचित् मरणम् अपि प्राप्नुवन्ति । ४. कार्टूनचलचित्रेषु चित्राणां परिवर्तनं वेगेन भवति । एवं त्वरमाणानि चित्राणि सातत्येन पश्यन्तः बालकाः वेगयुक्तानां विषयाणां ग्रहणे एव अभ्यस्ताः भवन्ति । अतः विद्यालयेषु सामान्यतः क्रमशः शनैः शिक्ष्यमाणाः विषयाः बालकेभ्यः न रोचन्ते । अतः विस्तृतेभ्यः विषयेभ्यः ते दूरे तिष्ठन्ति । ५. कार्टूनचलचित्रेषु चित्रपरिवर्तनस्य प्रवेगः बालकानां दृष्टेः हानिकरः भवति । दृष्टेः पुरतः यानि चित्राणि प्रस्तुतानि भवन्ति, तेषां मस्तिष्कं यावत् प्रापणस्य कार्यं नेत्रयोः विद्यमानौ 'Rod' 'Con' इति कोषौ कुरुतः । दूरदर्शने अतीव शीघ्रं परिवर्तमानानां चित्राणां यत् उचितं सन्धानम् आवश्यकम्, तत् तौ कोषौ कर्तुं न शक्नुतः । परिणामतः नेत्रयोः श्रान्तिः भवति । ज्वलनं भवति । क्वचित् जलं स्रवति । हानेः एतावत् वर्णनं पर्याप्तं नास्ति । विस्तारं कर्तुं शक्नुमः । परन्तु सङ्क्षेपेण ज्ञातव्यं यत् कार्टूनचलचित्राणि, वयं यावत् चिन्तयामः तावत्, निर्मलानि न सन्ति । अन्यानि राष्ट्राणि जागरितानि । कुम्भकर्णस्य अनुयायिनः वयं कदा जागरिष्यामः ?

# स्वावलम्बनम्

रामशर्मा सोमगुप्तः च सखायौ । तौ उभौ अपि दरिद्रौ । अतः कदाचित् तौ धनार्जनं कर्तुं स्वग्रामतः प्रस्थितौ । बहुदूरं गतौ तौ अतीव श्रान्तौ जातौ । मध्येमार्गं कस्यचन मुनेः आश्रमः ताभ्यां दृष्टः । मुनिः तयोः आगमनकारणं ज्ञात्वा तौ बोधितवान् – ''पुत्रौ ! भवतोः अन्यतरः ब्राह्मणः अस्ति । ब्राह्मणः धनमोहे निमग्नः न भवेत् । सः ज्ञानार्जने निरतः सन् विद्यादानं कुर्यात् । भवतोः अपरः वैश्यः । सः मत्तः वाणिज्यव्यवहारान् ज्ञात्वा तेन धनार्जनं कर्तुम् अर्हति । किन्तु वैश्यस्य धनार्जनमात्रमेव कार्यं न भवेत् । सः जनतायाः सेवायाम् अपि निरतः भवेत् । अनेन सः यशः प्राप्नोति'' इति ।

मुनेः सूचनानुगुणं तौ उभौ अपि वर्षत्रयं तत्रैव विद्याभ्यासं कृतवन्तौ । रामशर्मा अनेकेषु शास्त्रेषु पाण्डित्यं प्राप्तवान् । सोमगुप्तः अपि वाणिज्यविषये स्थितानि रहस्यानि ज्ञातवान् । ततः रामशर्मा स्वीयेन पाण्डित्येन राजास्थाने उद्योगं लब्धवान् । सोमगुप्तः अपि वाणिज्ये उत्तमं स्थानं प्राप्तवान् । एवं पञ्चसु वर्षेषु तौ उभौ अपि धनिकेषु अन्यतमत्वेन परिगणितौ जातौ । बहूनि वर्षाणि अतीतानि ! रामशर्मणः पुत्रः कृष्णशर्मा प्रौढः अभवत् । किन्तु पुत्रस्य विषये पितुः महती चिन्ता उत्पन्ना । यतः सः पुत्रः अनुक्तग्राही । सर्वदा क्रीडायाम् अटने च निरतः सः पठने अनासक्तः । रामशर्मा तु महान्तं प्रयत्नं कृतवान् पुत्रं विद्यावन्तं कर्तुम् । किन्तु तस्य प्रयत्नः विफलः एव अभवत् । एवं स्थिते काचन अनूह्या घटना संवृत्ता ।

कदाचित् रामशर्मा विद्यार्थिनः कञ्चित् श्लोकं पाठयति स्म । स श्लोकः क्लिष्टः आसीत् इति कारणात् विद्यार्थिनः तस्य तात्पर्यं शीघ्रं न गृहीतवन्तः । बहुवारं श्लोकपाठनेनापि विद्यार्थिभिः तस्य अर्थः न ज्ञातः एव । तेन श्रान्तः सन् रामशर्मा विश्रामाय गृहाभ्यन्तरं गतः । विद्यार्थिनः बोधयितुं पित्रा रामशर्मणा क्रियमाणं परिश्रमं कृष्णशर्मा अवलोकितवान् । पिता श्रान्तः सन् यदा गृहाभ्यन्तरं गतः तदा कृष्णशर्मा आगत्य पितुः आसने उपविश्य विद्यार्थिनां पाठनम् आरब्धवान् । यस्य श्लोकस्य पाठनेन रामशर्मा नितरां श्रान्तः, तमेव श्लोकं कृष्णशर्मा सलीलं बोधितवान् । विद्यार्थिनः कृष्णशर्मणः बोधनेन सुलभतया एव तस्य तात्पर्यं ज्ञातवन्तः ।

गृहे उपविश्य एव रामशर्मा एतं चमत्कारं दृष्ट्वा नितराम् आश्चर्यचकितः । तेन चिन्तितं यत् मम पुत्रः न मूर्खः इति । 'मम पुत्रे स्थिता स्मरणशक्तिः अन्यादृशी । सः कठिनानि अपि शास्त्राणि सुलभतया प्राप्तुं शक्नोति' इति मत्वा सः पुत्रं स्वाभिप्रायम् अवगमितवान् । किन्तु तदा पुत्रेण पृष्टं – ''विद्याभ्यासः किमर्थं करणीयः ?'' इति । ''सर्वेषाम् आदरं गौरवं च विद्यया एव प्राप्स्यते । धनार्जनाय अपि विद्या एव आवश्यकी'' इति उक्तवान् पिता रामशर्मा । ''जनाः इदानीमपि मां सगौरवं सादरं च पश्यन्ति । यतः अहं पण्डितस्य पुत्रः अस्मि । ब्राह्मणः अस्मि इत्यतः जनैः पूजापि क्रियते । अहं धनिकस्य भवतः पुत्रः अस्मि अपि । अतः धनार्जनं किमर्थं करणीयं मया ?'' इति कृष्णशर्मा पितरं पृष्टवान् ।

पुत्रस्य एतादृशेन विचारेण रामशर्मा किमपि वक्तुं समर्थः नाभवत् । अस्याम् एव चिन्तायां सः मग्नः जातः । तस्मिन् एव समये मित्रं सोमगुप्तः तदीयं गृहं प्रति आगतः । मित्रस्य आगमनात् रामशर्मणः मनसः किञ्चित् सन्तोषः जातः । किन्तु सोमगुप्तस्य कथनेन ज्ञानं यत् सोमगुप्तस्य पुत्रः वसुगुप्तः अपि रामशर्मणः पुत्रः इव पितरम् 'अहं धनिकस्य पुत्रः अस्मि । मया किमर्थं धनार्जनं करणीयम्' इति पृच्छति इति ।

समानपरिस्थितौ स्थितयोः तयोः चिन्ता इदानीं तस्याः समस्यायाः परिहारे प्रवृत्ता । तौ उभौ अपि कञ्चित् उपायं चिन्तितवन्तौ । तदनुगुणं सोमगुप्तः पुत्रस्य वसुगुप्तस्य वसतिं रामगुप्तगृहे कल्पयित्वा वाणिज्यार्थं देशान्तरं गतः पत्न्या सह । गमनात् पूर्वं सेवकद्वयं पुत्रस्य रक्षणे नियोजितवान् सः । ततः गच्छता कालेन कृष्णशर्मवसुगुप्तयोः महती मैत्री उत्पन्ना ।

मासद्वयम् अतीतम्। एकस्मिन् दिने रामशर्मा वसुगुप्तम् आहूय उक्तवान् – ''भवतः पिता धनं प्रेषयितुं पत्रं लिखितवान्। अतः आपणं विक्रीय भवान् पित्रे धनं प्रेषयतु'' इति। किन्तु वसुगुप्तः तद्विषये अवधानमेव न दत्तवान्। पुनरेकः मासः अतीतः। वसुगुप्तस्य समीपं कश्चन आगत्य काञ्चन आघातकरीं वार्तां श्रावितवान् – ''भवतः पितुः सोमगुप्तस्य नौका जले निमग्ना। नौकास्थः भवतः पिता अपि सपत्नीकः जले निमग्नः। तदीया सकला सम्पदपि विनष्टा। महता प्रयत्नेन तौ वयं तीरं प्रति आनीतवन्तः। किन्तु दौर्भाग्येन तौ सजीवं न स्थितौ'' इति। एतां वार्तां श्रुत्वा वसुगुप्तः रोदनम् आरब्धवान्। रामशर्मा तस्य सान्त्वनं कृत्वा उक्तवान् – ''वत्स ! आर्थिकी दुर्गतिः मां बाधते अतः मया अप्रियम् अपि किञ्चित् वक्तव्यम् एव। अहं भवतः पिता इव न वणिक्। अतः भवतः पालनं कर्तुम् अहं न शक्नोमि। इतः परं भवता स्वस्य जीवनं स्वयमेव निर्वोढव्यम्'' इति।

एतत् वचनं वसुगुप्ते कोपम् अजनयत्। कोपेन एव सः रामशर्मणः गृहात् प्रस्थितः। किन्तु कुत्रापि तेन स्थलं न लब्धम्। बुभुक्षया पीडितः सः अगतिकः सन् पुनः रामशर्मणः गृहम् आगत्य – 'भोक्तुं किमपि ददातु' इति रामशर्माणं प्रार्थितवान्। रामशर्मणा भोजनव्यवस्थां कृत्वा उक्तं यत् बहूनि दिनानि अहम् एतां व्यवस्थां कर्तुं न शक्नोमि। पितुः वचनं श्रुत्वा कृष्णशर्मा कुपितः। सः पितुः समीपम् आगत्य – ''भवतः मित्रस्य पुत्रः अस्ति वसुगुप्तः। तस्य रक्षणं भवतः दायित्वं नास्ति किम् ?'' इति पृष्टवान्। ''सोमगुप्तः मम मित्रम्। यदि सः आपदि निमग्नः स्यात् तर्हि अहं निश्चयेन तस्य साहाय्यं कुर्याम् एव। किन्तु वसुगुप्तविषये मम किमपि दायित्वं नास्ति'' इति उक्तवान् रामशर्मा। ''वसुगुप्तविषये भवतः दायित्वं न स्यात्। किन्तु सः मम मित्रम् अस्ति। मम मित्रस्य विषये अस्माकं गृहे आदरः भवेत् एव'' इति उक्तवान् कृष्णशर्मा।

एवं वक्तुं भवतः अधिकारः कः ?'' इति तिरस्कारेण पृष्टवान् रामशर्मा। ''भगवतः पूजा क्रियते इति कारणेनैव अर्चकोऽपि भगवान् इव पूज्यते जनैः। तथैव अहमपि महापण्डितस्य रामशर्मणः पुत्रः अस्मि। एतदेव मम अधिकारं न द्योतयति किम् ?'' इति पृष्टवान् कृष्णशर्मा। रामशर्मा क्षणं विचिन्त्य उक्तवान् – ''अहम् अग्रे भवते योग्यम् उत्तरं दास्यामि। इदानीं मया उच्यमानं कार्यं भवान् करोतु। वसुगुप्तस्य सेवकौ आहूय वसुगुप्तस्य सेवां कर्तुं तौ वदतु। अन्तरं यत् प्रवृत्तं तत् मां सूचयतु'' इति। कृष्णशर्मा सोत्साहं तत् कार्यं कर्तुं धावितवान् ! तौ सेवकौ एतावत्पर्यन्तं धनेन विनैव सेवां कुरुतः स्म। किन्तु इदानीं वसुगुप्तस्य विषये तिरस्कारवचनानि उक्त्वा – ''इतःपरं दरिद्रस्य वसुगुप्तस्य सेवां कर्तुम् आवां न सिद्धौ'' इति तौ उक्तवन्तौ कृष्णशर्माणम्। अनेन उत्तरेण आश्चर्यचकितः कृष्णशर्मा आगत्य पितरं प्रवृत्तं सर्वं श्रावितवान्।

तदा रामशर्मा विहस्य उक्तवान् – ''तयोः वचनं सत्यमेव। इदानीं वसुगुप्तस्य किमपि व्यक्तित्वमेव नास्ति। पितुः सान्निध्येनैव तस्मिन् गौरवम् उत्पन्नम् आसीत्। पितुः धनमेव अत्र कारणम्। धनरहितः वसुगुप्तः इदानीं सामान्यजनत्वेन परिगणितः जातः। भवान् अपि मम पाण्डित्यात् आदरं प्राप्नुवन् अस्ति। मम सम्पत्तिस्तु पाण्डित्यमेव। सा सम्पत् यदि भवति न भवति तर्हि भवानपि वसुगुप्तः इव अग्रे कष्टम् अनुभविष्यति। स्वेन अर्जितेन धनादिना एव गौरवं सम्पादनीयम्, न तु अन्येन आर्जितेन धनादिना। स्वार्जितं सर्वदा स्वाधीनं स्थास्यति'' इति।

तदा कृष्णशर्मा क्षणकालं विचिन्त्य – 'स्वावलम्बनम् अवश्यमेव स्यात् मानवे। स्वावलम्बनकारणात् एव भवान् मित्रस्य साहाय्यम् आचरितुं समर्थः। अहं तु मम मित्रस्य साहाय्यं कर्तुम् असमर्थः अस्मि' इति उक्तवान्।

''भवान् स्वीयेन मित्रेण सह मया उक्ते स्थले कानिचन वर्षाणि उषित्वा विद्याभ्यासं करोतु'' इति पुत्रम् उक्त्वा रामशर्मणा स्वेन यत्र अधीतं तम् आश्रमं प्रति पुत्रः तत्सुहृत् च प्रेषितौ। कृष्णशर्मा वसुगुप्तश्च वर्षद्वयं तस्मिन् मुनेः आश्रमे विद्याम् अधीत्य प्रत्यागतौ। वस्तुतः वसुगुप्तस्य पिता न मृतः। अपि तु इतोऽपि आढ्यतरः एव जातः आसीत् सः।

'एतत् सर्वम् आवां बोधयितुं पितृभ्यां कृतं नाटकम्' इति कृष्णशर्मा वसुगुप्तश्च ज्ञातवन्तौ।

## स्वप्नवासवदत्तम् ( ग्रन्थपरिचयः )

✍ व्योम शाहः

**अनुवर्तते....**

महाकविभासविरचिते स्वप्नवासवदत्ताभिधे नाटके एतावता अस्माभिः दृष्टं यत् प्रच्छन्नवेषधारी योगन्धरायणः अवन्तिकारूपधारिणीं वासवदत्ताम् आश्रमे स्थापयति। द्वितीयाङ्के अवन्तिका(वासवदत्ता)-पद्मावत्याः मिथः मैत्री समुपवर्णिता। तृतीयाङ्के विवाहस्य सज्जताः प्रचलन्ति। तत्र वासवदत्ता दुःखेन पद्मावत्यै कौतुकमालिकां निर्माति। तया तत् कर्तव्यम् अभवद् इति खिन्ना सा निर्गच्छति।

तृतीयाङ्कसत्कः वृत्तान्तः तस्यैव दिनस्य। अङ्कस्य आरम्भः प्रमदवने भवति। वासवदत्ताम् आत्मनः प्रियविरहितं जीवनं गर्हते। तदैव चेटी प्रविश्य वासवदत्तायै कौतुकमालां गुम्फितुं कथयति। इयं कौतुकमालिका पद्मावत्यै निर्मातव्या इति विज्ञाय सा आत्मानं भाग्यं गर्हते। चेटी उदयनः शरचापरहितः कामदेवः इति प्रशंसति तस्य रूपम्। वासवदत्ता अविधवाकरणैः औषधैः सहितां सपत्नीमर्दनेन औषधेन रहितां कौतुकमालिकां निर्माय चेटीभ्यां समर्प्य खिन्ना सती ततः निर्गच्छति। चतुर्थाङ्कस्य प्रवेशकेन इदं ज्ञाप्यते- राज्ञः विवाहः सुखेन सम्पन्नः। अङ्कस्य प्रारम्भः विवाहस्य कतिचिद् दिवसानन्तरं भवति। चेटी पद्मावती अवन्तिकारूपधारिणी च वासवदत्ता प्रमदवने प्रविशन्ति। ततः शेफालिकाकुसुमानां विकसनं दृष्ट्वा ताः एकत्र उपविश्य संवादम् आरभन्ते। अचिरादेव सः संवादः उदयनविषयी भवति। तदा "मम आर्यपुत्रस्तथैव आर्यायाः वासवदत्तायाः" इति श्रुते वासवदत्ते "ततोऽपि अधिकम्" इति अभिदधाति। प्रयत्नेन सा अतिक्रान्तं तं समुदाचारं वारयति। भर्तृदारकः वासवदत्तां स्मरति इति पद्मावत्या विज्ञाय सा हर्षम् उपागता। तदा प्रमदवने अन्यस्मिन् विभागे प्रविशति उदयनः विदूषकेन सह। उदयनः वासवदत्तायाः स्मरणे मग्नः इति विचिन्त्य विदूषकः प्रत्यग्रैः विधिभिः तं वारयितुं प्रयतते। आर्यपुत्रम् आगतं दृष्ट्वा पद्मावती चेट्या वासवदत्तया च सह माधवीमण्डपं प्रविशति।

विदूषकः आर्यपुत्रश्च तत्र प्राप्तवन्तौ यत्र पद्मावती शेफालिकापुष्पाणि आचित्य स्थापितवती। तत्रैव प्रतीक्षां कर्तुम् आर्यपुत्रेण उक्ते सति विदूषकः आतपहेतुना माधवीमण्डपे उपवेष्टुं कथयति तदैव सः मधुकरैः त्रस्तः। एतद्दृष्ट्वा पुनरपि उदयनः विरहमेव रसं प्रकटयति -

**"मधुमदकला मधुकरा मदनार्ताभिः प्रियाभिरुपगूढाः। पदन्यासविषण्णा वयमिव कान्ता वियुक्ता स्युः॥"**

विदूषकः राजा च तत्रैव उपविष्टौ। "वासवदत्ता-पद्मावत्योः का प्रियतरा भर्तुदारकस्य" इति विदूषकेन पृष्टे प्रथमं तु उदयनः न वदति। ततः बलेन पृष्टे -

**"पद्मावती बहुमता मम यद्यपि रूपशीलमाधुर्यैः। वासवदत्ताबद्धं न तु तावन्मे मनो हरति॥"**

इत्युक्तम्। अदूरवर्तिनीभ्यां वासवदत्ता-पद्मावतीभ्यामिदं श्रुत्वा वासवदत्ता हृष्टा चेटी च खिन्ना। "अदाक्षिण्यः राजपुत्रः" इति आक्षिपन्ती चेटी पद्मावत्या वारिता। राजा एतदेव विदूषकं पृच्छति। विदूषकस्य तु वासवदत्ता बहुमता परं पद्मावती तु सदाक्षिण्यादिगुणयुक्ता। वासवदत्तायाः स्मरणेन अश्रुपातैः व्याप्तं मुखं प्रक्षालयितुं विदूषकः मुखोदकम् आनयति। तदैव पद्मावती प्रविश्य विदूषकाद् मुखोदकं गृहीत्वा स्वयं भर्तृदारकाय अर्पयति। पद्मावती नवोढा व्यथां न व्रजेद् इति कामेन उदयनः 'काशपुष्पलवेन मुखं साश्रुपातम्' इति सूचयति। मगधराजेन सह मेलनाय गन्तव्यमिति उभौ निष्क्रामतः तेन अङ्कस्य समाप्तिः भवति। पञ्चमाङ्कस्य प्रवेशकेन इदं ज्ञाप्यते - पद्मावती शीर्षवेदनया पीडिता। ताम् अनुकूलयितुं वासवदत्ता आहूयते। भर्तृदारकं दर्शनाय निवेदयितुं वसन्तकः सूच्यते। पद्मावती समुद्रगृहके शय्यायां स्थिता। ततः अङ्कस्य प्रारम्भे विदूषकः भर्तृदारकं समुद्रगृहकं प्रेषयति। उभौ तत्र प्रविशतः। तत्र पद्मावती न दृष्टा। भर्तृदारकमतेन तु सा आगता एव न। निद्राबाधितो राजा तत्र उपविशति विदूषकश्च तं कथया विनोदयति।

**( क्रमशः... )**

# मासवार्त्ताः

## गान्धिनगरे आरब्धम् एकलव्य-संस्कृत-एकेडेमीसंस्थानस्य केन्द्रम्











કેપિટલ વર્તમાન

**ગાંધીનગરમાં એકલવ્ય સંસ્કૃત એકેડેમીનો વિધિવત આરંભ થયો**

ગાંધીનગર

ગાંધીનગરના રાંદેસણ મેટ્રો સ્ટેશન પાસે આવેલ સત્ત્વવાટિકામાં એકલવ્ય સંસ્કૃત એકેડેમી સંસ્થાનાં નવાં કેન્દ્રનો વિધિવત આરંભ થયો હતો. તેના ઉદ્ઘાટન સત્રમાં ગુજરાત સાહિત્ય અકાદમીના અધ્યક્ષ ડૉ. ભાગ્યેશ જહા, ચિલ્ડ્રન્સ યુનિવર્સિટીના કુલપતિ ડૉ. ટી. એસ. જોષી, જાણીતા ગાયનેકોલોજિસ્ટ ડૉ. પ્રકાશ જોષી, એકલવ્ય સંસ્કૃત એકેડેમી, અમદાવાદના નિદેશક ડૉ. મિહિર ઉપાધ્યાય અને એકલવ્ય સંસ્કૃત એકેડેમી સંસ્થાનાં ગાંધીનગર કેન્દ્રનાં સંયોજિકા શ્રીમતી ઈલા જોષીએદીપપ્રાગટ્ય કરીને કાર્યક્રમની શરૂઆત કરી હતી. જેમાં ૨૫૦ જેટલાં ગાંધીનગરના સંસ્કૃત અનુરાગી નગરજનોએ ઉપસ્થિતિ આપી હતી અને સંસ્કૃત ભણવા માટે નોંધણી પણ કરાવી હતી. આ પ્રસંગે ગુજરાત રાજ્યના ઈન્ફોર્મેશન કમિશનર શ્રી વિપુલ રાવલ, ગાંધીનગર સાહિત્યસભાના પૂર્વ અધ્યક્ષ સંજય થોરાત 'સ્વજન' ખાસ હાજર રહ્યા હતા. સંસ્થાના નિદેશક ડૉ. મિહિર ઉપાધ્યાયે સંસ્કૃત ભાષાનાં અભ્યાસક્રમો વિશે જણાવ્યું કે, સંસ્કૃત ભાષા શિક્ષણ વર્ગ, બાલ સંસ્કૃત વર્ગ, ડિપ્લોમા ઇન સંસ્કૃત ટીચીંગ, સ્તોત્રપાઠ જેવા અનેક અભ્યાસક્રમોમાં વર્ષે ૩૦૦થી વધુ વિદ્યાર્થીઓ જોડાય છે જેમાં સિનિયર કે.જી.થી લઈને સિનિયર સિટીઝન સુધી સૌ કોઈ માટે સંસ્કૃત શીખવાની વ્યવસ્થા છે." આ પ્રસંગે ડૉ. ભાગ્યેશ જહાએ લોકોને સંસ્કૃત ભાષાનાં સૌંદર્યથી પરિચિત કરાવીનેસંસ્કૃતનાંઅધ્યયન માટેપ્રેરિત કર્યાહતા. ગાંધીનગરમાં હવેસૌસંસ્કૃત ભાષા બોલી અને વાંચી શકે એ માટે એકલવ્ય સંસ્કૃત અકાદમી મદદરૂપ થશે.

एकलव्य-संस्कृत-एकेडेमीसंस्थानं २००५ तः संस्कृतभाषायाः प्रचाराय कार्यरतं वर्तते । संस्थानम् आबालवृद्धानां सर्वेषां कृते विविधान् शैक्षिकान् सांस्कृतिकान् च कार्यक्रमान् 'Online, Offline' इति माध्यमेन सञ्चालयति। अधुना गुजरातस्य पाटनगरे अपि एकलव्य-संस्कृत-एकेडेमी संस्कृतकार्यं करिष्यति। एप्रिलमासस्य २६ दिनाङ्के गान्धिनगरे, रांदेसणनगरे, सत्त्ववाटिकायाम् एकलव्य-संस्कृत-एकेडेमीसंस्थानस्य नूतनस्य केन्द्रस्य आरम्भः अभवत्। नूतनकेन्द्रस्य उद्घाटनकार्यक्रमेऽस्मिन् संस्कृत-साहित्य-अकादम्याः अध्यक्षः डॉ. भाग्येशः जहामहोदयः, चिल्ड्रन्स-विश्वविद्यालयस्य कुलपतिः डॉ. टी. एस. जोषीमहोदयः, डॉ. प्रकाशः जोषीमहोदयः संस्थानस्य गान्धिनगरविभागस्य संयोजिका श्रीमती ईला जोषी, संस्थानस्य निदेशकः डॉ. मिहिरः उपाध्यायः च उपस्थिताः आसन् । श्रीमती ईला जोषीमहोदयायाः सहयोगेन आयोजितेऽस्मिन् केन्द्रे बालसंस्कृतवर्गाणां, संस्कृतभाषाशिक्षणवर्गाणाम् च आयोजनं मईमासस्य १२ दिनाङ्कतः भविष्यति। उल्लेखनीयं यत् कार्यक्रमेऽस्मिन् गान्धिनगरस्थाः द्विशताधिकाः संस्कृतप्रेमिणः उपस्थिताः आसन्।

## कृपया हसन्तु

**नमनः - (पितरम् उद्दिश्य) तात ! श्रीरामः स्वपितुः दशरथस्य वचनानुपालनेन कीर्तिं प्राप्तवान् । परन्तु प्रह्लादः तु स्वपितुः हिरण्यकशिपोः वचनम् अश्रुत्वा अपि कीर्तिं प्राप्तवान् । अधुना मया किं कर्तव्यम् इति न अवगच्छामि ।**

**पिता - भोः पुत्र ! नायं सत्ययुगः न वा त्रेतायुगः । अयं तु कलियुगः । अस्मिन् युगे यदि शान्तिम् इच्छति तर्हि आवाभ्यां मिलित्वा तव मातुः वचनमेव श्रोतव्यम् ।**

★ ★ ★ ★ ★



**स्वामी - त्वं कार्यालयं विलम्बेन किमर्थम् आगच्छसि ?**

**कर्मचारी - अहं प्रातः विलम्बेन उत्तिष्ठामि अतः ।**

**स्वामी - प्रातः शीघ्रं किमर्थं न उत्तिष्ठसि ?**

**कर्मचारी - विलम्बेन स्वपिमि अतः ।**

**स्वामी - विलम्बेन किमर्थं स्वपिषि ?**

**कर्मचारी - कार्यालयात् विलम्बेन गृहं गच्छामि अतः । (ततः स्वामी किमपि न अपृच्छत् ।)**

★ ★ ★ ★ ★

**वैद्यः - (नमनम् उद्दिश्य) भोः नमन ! मया ज्ञातं यत् त्वं विना कारणम् एव औषधं स्वीकरोषि । एवं किमर्थम् ?**

**नमनः - भोः महोदय ! मम पिता सर्वदा मां वदति स्म यत्, 'यदा शत्रुः सिद्धः न भवति तदैव शत्रोः उपरि आक्रमणं कर्तव्यम् । अतः अहम् औषधं पूर्वमेव स्वीकरोमि ।'**

## सुभाषितम्

**– संस्कृतविकिपीडियाजालस्थानात्**

**वज्रादपि कठोराणि मृदूनि कुसुमादपि ।**
**लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हति ॥**

**तात्पर्यम्** – स्वस्य विषये वज्रादपि कठोरम्, अन्येषां विषये कुसुमादपि मृदु मनः येषां पुरुषश्रेष्ठानां भवति तादृशानां मनसः अवगमने कः समर्थः ?

**वदनं प्रसादसदनं सदयं हृदयं सुधामुचो वाचः ।**
**करणं परोपकरणं येषां केषां न ते वन्द्याः ॥**


**तात्पर्यम्** – प्रसन्नं मुखं, करुणापूर्णं हृदयम्, अमृतसदृशानि वचनानि, परोपकारपरः व्यवहारः च येषां भवेत् ते केषां वन्द्याः न ?

**वन्दे सत्पुरुषान् लोके गुणग्रहणतत्परान् ।**
**राजहंसानिव जलात् क्षीरग्रहणकोविदान् ॥**

**तात्पर्यम्** – जलं क्षीरञ्च संयोज्य स्थापितं चेत् राजहंसाः क्षीरमात्रस्य स्वीकरणे यथा कुशलाः तथा सज्जनाः जनेषु गुणग्रहणे कुशलाः भवन्ति । तादृशान् अहं वन्दे ।

## ज्ञानसरित्

श्यामः पटेलः



**'किवि' – फलम् उत पक्षी ?** भारते विश्वे च 'किवि' नामकं फलं सुप्रसिद्धं जातम् अस्ति। किन्तु किं भवन्तः जानन्ति यत् 'किविफलम्' मूलतः 'किवि' पक्षी इव दृश्यते। अतः पक्षिनाम्ना एव फलमिदं लोके व्यवह्रियते। चलन्तु, अद्य उभयोः 'किवि' इत्यनयोः विषये ज्ञातुं यतामहे। न्यूजिलेंड-देशस्य राष्ट्रीयपक्षी 'किवि' अस्ति। ये पक्षिणः डयितुं न शक्नुवन्ति तेषां पक्षिणाम् अयं लघुतमः अस्ति। अतः न्यूजिलेंडदेशतः डयित्वा नान्यत्र गन्तुं समर्थः। जलवायू अपि न्यूजिलेंडदेशस्य एव अनुकूलौ स्तः। अतः अन्येषु देशेष्वपि प्राणिसङ्ग्रहालये च नायं दृष्टिगोचरो भवति। एषः उलूकः इव रात्रिचरः अस्ति। तस्य कानिचन अङ्गानि मूषकस्य अङ्गानि इव, कानिचन 'डायनासोर' इत्यस्य अङ्गानि इव भवन्ति। इदानीं किविफलस्य परिचयं प्राप्नुमः।

लम्बवृत्ताकारं किविफलं बहिः ताम्रवर्णम्, अन्तस्तात् हरितवर्णं सौवर्णं वा भवति। मध्ये मध्ये तिलः इव कृष्णवर्णानि बीजानि अपि भवन्ति। अस्य उद्भवः द्वादश्यां शताब्द्यां मूलतः चीनदेशे जातः। ततः विंशत्यां शताब्द्यां न्यूजिलेंडदेशे अस्य कृषिः समारब्धा। तदनु द्वितीये विश्वयुद्धे किविफलं प्रसिद्धं जातम्। ततः आरभ्य ग्रेट-ब्रिटेनदेशम् अमेरिकादेशं प्रति निर्यातम् आरब्धम्। विंशतिशताब्द्याः द्वितीयपरार्धानन्तरं न्यूजिलेंडदेशस्य निर्यातकाराः अस्य फलस्य नामकरणं 'किविफलम्' इति कृतवन्तः। ओस्ट्रेलियादेशे न्यूजिलेंडदेशे च केवलं 'किवि' इति शब्दस्य प्रयोगः पक्षिनिमित्तं तथा च न्यूजिलेंडदेशस्य जनानाम् उपनामरूपेण भवति। फलनिमित्तं तु 'किविफलम्' इत्येव व्यवहरणीयम्।

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **प्रत्यग्रः** | अभिनव | new |
| **शस्त्री** | चाकू | knife |
| **विश्वस्ता** | विधवा | widow |
| **गन्धवहः** | वायु | air |
| **विहापितम्** | दान | donation |
| **आश्लेषः** | आलिंगन | embracing |
| **सुभगः** | भाग्यवान् | fortunate |
| **आस्पदम्** | स्थान | place |
| **श्रेणिः** | शृंखला | line/series |
| **स्पन्दः** | धड़कना | trembling |
| **प्रतीपदर्शिनी** | स्त्री | woman |
| **तन्तुः** | धागा | thread |
| **विशदः** | श्वेत | white |
| **विसौख्यम्** | सुखहीनता | suffering |
| **दैतेयः** | दानव | demon |

## किं भवन्तः जानन्ति ?

**१) पञ्चवटी कस्याः नद्याः तटे आसीत् ?**
(क) गोदावर्याः (ख) गङ्गायाः (ग) तमसायाः (घ) चर्मण्वत्याः

**२) कस्यां नद्यां स्नात्वा सन्तानलोकः प्राप्यते ?**
(क) गङ्गायाम् (ख) सरयूनद्याम् (ग) ताप्त्याम् (घ) गोदावर्याम्

**३) प्रयागे कयोः नद्योः सङ्गमः वर्तते ?**
(क) गङ्गासरयोः (ख) नर्मदाताप्त्योः (ग) गङ्गायमुनयोः (घ) यमुनाघाघरयोः

**४) परमधामगमनाय श्रीरामः कस्यां नद्यां समाधिं स्वीकृतवान् आसीत् ?**
(क) गङ्गायाम् (ख) सरयूनद्याम् (ग) तमसायाम् (घ) गोमत्याम्

**५) झेलम-चेनाब-रावी-व्यास-सतलजनदीनां सम्बन्धः केन राज्यने सह अस्ति ?**
(क) राजस्थान (ख) गुजरात (ग) पञ्जाब (घ) महाराष्ट्र

**६) एतासु का नदी कैलासात् निसृत्य सिन्धप्रान्ततः अरबसागरे पतति ?**
(क) गङ्गा (ख) ब्रह्मपुत्र (ग) सिन्धुः (घ) घाघरा

**७) गङ्गानन्तरं द्वितीयं बृहत् क्षेत्रं कस्याः नद्याः वर्तते ?**
(क) कृष्णायाः (ख) गोदावर्याः (ग) कावेर्याः (घ) यमुनायाः

उत्तराणि – (१) क (२) ख (३) ग (४) ख (५) ग (६) ग (७) ख

# अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT ACADEMY

**Learn...**

**SANSKRIT**

**with fun ...**

**Eklavya Sanskrit Academy**
**present**



## SANSKRIT SUMMER CAMP

**for children**
**(Class SKg to 8)**

**From 12/05/2025 to 21/05/2025**
**Daily 10 AM to 11.30 AM**
**Fees: ₹ 3000/-**

**Why learn Sanskrit?**

Sharpens memory
Cures speech disorders
Improves pronunciation ability
Develops communication skills
Increases awareness about Indian Traditional Wisdom

**Contact :**
Dr. Mihir Upadhyay
+(91) 98246 16237]
Ila Joshi
+(91) 63510 34630

**Venue:**
Satva vatika
Opp Randesan Metro station
Gandhinagar

---

Online

EKLAVYA SANSKRIT ACADEMY

Admission Open

**Value Education Through Sanskrit**

# बालसंस्कृतवर्गः

## SANSKRIT SUMMER CAMP



**(Class 4 to 8)**

**Date :** 15/5/25 to 24/5/25
**Day :** Daily
**Time :** 3:00pm to 4.30pm
**Fees :** 2500/-

**Contact :** Dr. Mihir Upadhyay - (91) 098246 16237

---

संस्कृत-
**साम्प्रतम्**

नमस्कारः

यदि भवन्तः ''साम्प्रतम्'' मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

| | |
|---|---|
| वार्षिकं रू | – 100 |
| द्वैवार्षिकं रू | – 175 |
| त्रैवार्षिकं रू | – 250 |
| अङ्कमूल्यं रू | – 10 |

**धन्यवादः...**

**संस्कृतसाम्प्रतं पत्रिका नवदशवर्षेभ्यः प्रतिमासं संस्कृताभिमानिनां सेवायां प्रकाश्यते । संस्कृताभिमानिनां भवतां सहयोगेन सरस्वतीमातुः कृपया च पत्रिकायाः यात्रा विंशतितमे वर्षे आरभ्यते । एतस्मिन् प्रसङ्गे वयं ग्राहकानां सहयोगिनां च ऋणं स्वीकुर्मः धन्यवादाश्च व्याहरामः । सम्पादकः**

**प्रियवाचकाः**

- **भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।**
- **पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।**

EKLAVYA SANSKRIT ACADEMY
|| जयतु संस्कृतं जयतु भारतम् ||

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006